श्री गणेशाय नमः

# श्रीगणपतिस्त्रोत्रम्

जेतुं यस्त्रिपुरं हरेण हरिणा व्याजाद्बलिं बधन्ता
स्त्रष्टुं वारिभवोभ्दवेन भुवनं शेषेण धर्तु धराम्।
पार्वत्या महिषासुरप्रमथने सिद्धाधिपैः सिद्धये
ध्यातः पञ्चशरेण विश्वजितये पायात्स नागाननः ।। १।।

निःशुल्क वित्तरण

अमरनाथ त्रसल

वृद्ध आश्रम

अम्बफला, जम्मू ।

Rafte.

Red ink.

# प्रातः स्मरणम्

## श्री गणेशस्य

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूरपरिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्ड-
माखण्डलादिसुरनायकवृन्दवन्द्यम् ॥ १ ॥

प्रातर्नमामि चतुराननवन्द्यमान-
मिच्छानुकूलमखिलं च वरं ददानम् ।
तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥ २ ॥

प्रातर्भजाम्यभयदं खलु भक्तशोक-
दावानलं गणविभुं वरकुञ्जरास्यम् ।
अज्ञानकाननविनाशनहव्यवाह-
मुत्साहवर्धनमहं सुतमीश्वरस्य ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥ ४ ॥

## श्री शिवस्य

प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधरं वृषभवाहनमम्बिकेशम् ।
खट्वाङ्गशूलवरदाभयहस्तमीशं
संसाररोगहरमौषधमद्वितीयम् ।।

प्रातर्नमामि गिरिशं गिरजार्द्धदेहं
सर्गस्थितिप्रलयकारणमादिदेवम् ।
विश्वेश्वरं विजितविश्वमनोऽभिरामं
संसाररोगहरमौषधमद्वितीयम् ॥ २ ॥
प्रातर्भजामि शिवमेकमनन्तमाद्यं
वेदान्तवेद्यमनघं पुरुषं महान्तम् ।
नामादिभेदरहितं षड्भावशून्यं
संसाररोगहरमौषधमद्वितीयम् ॥ ३ ॥
प्रातः समुत्थाय शिवं विचिन्त्य
श्लोकत्रयं येऽनुदिनं पठन्ति ।
ते दुःखजातं बहुजन्मसञ्चितं
हित्वा पदं यान्ति तदेव शम्भोः ॥ ४ ॥

॥ इति श्रीशिवस्य प्रातःस्मरणम् ॥

ॐ

# शक्तिस्तोत्राणि

## १८—ललितापञ्चकम्

प्रातः स्मरामि ललितावदनारविन्दं
विम्बाधरं पृथुलमौक्तिकशोभिनासम् ।
आकर्णदीर्घनयनं मणिकुण्डलाढ्यं
मन्दस्मितं मृगमदोज्ज्वलभालदेशम् ॥
प्रातर्भजामि ललिताभुजकल्पवल्लीं
रक्ताङ्गुलीयलसदङ्गुलिपल्लवाढ्याम् ।

माणिक्यहेमवलयाङ्गदशोभमानां
पुण्ड्रेक्षुचापकुसुमेषुसृणीदधानाम् ॥

प्रातर्नमामि ललिताचरणारविन्दं
भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।
पद्मासनादिसुरनायकपूजनीयं
पद्माङ्कुशध्वजसुदर्शनलाञ्छनाढ्यम् ॥ ३ ॥

प्रातः स्तुवे परशिवां ललितां भवानीं
त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टिविलयस्थितिहेतुभूतां
विद्येश्वरीं निगमवाङ्मनसातिदूराम् ॥ ४

प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति ।
श्रीशाम्भवीति जगतां जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥ ५ ॥

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।

तस्मै ददाति ललिता झटिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ।

इति श्रीमच्छङ्कराचार्यकृतं ललितापञ्चकं सम्पूर्णम् ।

## श्री विष्णो :

प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ १ ॥
प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य
पारायणप्रवणविप्रपरायणस्य ॥ २ ॥
प्रातर्भजामि भजतामभयङ्करं तं
प्राक्सर्वजन्मकृतपापभयापहत्यै ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोर-
शोकप्रणाशनकरो धृतशङ्खचक्रः ॥ ३ ॥

॥ इति श्रीविष्णोः प्रातःस्मरणम् ॥

### (ग) श्रीरामस्य

प्रातः स्मरामि रघुनाथमुखारविन्दं
मन्दस्मितं मधुरभाषि विशालभालम् ।
कर्णावलम्बिचलकुण्डलशोभिगण्डं
कर्णान्तदीर्घनयनं नयनाभिरामम् ॥ १ ॥
प्रातर्भजामि रघुनाथकरारविन्दं
रक्षोगणाय भयदं वरदं निजेभ्यः ।
यद्राजसंसदि विभज्य महेशचापं
सीताकरग्रहणमङ्गलमाप सद्यः ॥ २ ॥

प्रातर्नमामि रघुनाथपदारविन्दं
वज्राङ्कुशादिशुभरेखि सुखावहं मे ।
योगीन्द्रमानसमधुव्रतसेव्यमानं
शापापहं सपदि गौतमधर्मपत्न्याः ॥ ३ ॥

प्रातर्वदामि वचसा रघुनाथनाम
वाग्दोषहारि सकलं शमलं निहन्ति ।
यत्पार्वती स्वपतिना सह भोक्तुकामा
प्रीत्या सहस्रहरिनामसमं जजाप ॥ ४ ॥

प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं
नीलाम्बुजोत्पलसितेतररत्ननीलाम् ।
आमुक्तमौक्तिकविशेषविभूषणाढ्यां
ध्येयां समस्तमुनिभिर्जनमुक्तिहेतुम् ॥ ५ ॥

यः श्लोकपञ्चकमिदं प्रयतः पठेद्धि
नित्यं प्रभातसमये पुरुषः प्रबुद्धः ।
श्रीरामकिङ्करजनेषु स एव मुख्यो
भूत्वा प्रयाति हरिलोकमनन्यलभ्यम् ॥ ६ ॥

॥ इति श्रीरामस्य प्रातःस्मरणम् ॥

(घ) श्रीशिवस्य

## श्रीसूर्यस्य

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादिहेतुं

ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ।।

प्रातर्नमामि तरणिं तनुवाङ्मनोभि-

र्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च ।

वृष्टिप्रमोचनविनिग्रहहेतुभूतं

त्रैलोक्यपालनपरं त्रिगुणात्मकं च ।।

प्रातर्भजामि सावतारमनन्तशक्ति

पापौघशत्रुभयरोगहरं परं च ।

तं सर्वलोककलनात्मककालमूर्तिं

गोकण्ठबन्धनविमोचनमादिदेवम् ।। ३ ।।

श्लोकत्रयमिदं भानोः प्रातःकाले पठेत्तु यः ।

स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् ।। ४ ।।

## ।। अथ गणेशस्तोत्रम् ।।

श्रीगणेशाय नमः ।। बिभ्रद्दक्षिणहस्तपद्मयुगले दन्ताक्ष सूत्रे शुभे वामे मोदकपूर्णपात्रपरशू नागोपवीती त्रिटटक् । श्रीमान्सिहयुगासनः श्रुतियुगे शङ्खौ वहन्मौलिमान्दिश्यादीश्व रपुत्र एष भगवांल्लम्बोदरः शर्म नः ।। शुक्लाम्बधरं देवं शशिवर्णं चतुर्भुजम् । प्रसनन्वदनं ध्यायेत्सर्व विघ्नोपशान्तये ।। अभिप्रेतार्थसिद्ध्यर्थ पूजितो यः सुरैरपि। सर्वविघ्नघ्दे तस्मै गणाधिपतये नमः ।। गणानामधि पश्चण्डोगजवकस्त्रिलोचः प्रनन्नो भवतान्नित्यं वरदाता विनायकः ।। सुमुखश्चै कदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्नराजो विनायकः ।। धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि गणेशस्य समाहित : ।। यः पठेत्तु शिवोक्तानि

सलभेत्सिद्धिमुत्तमाम् । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते ।। ओं ।। चिदचित्पदगम्भीरं गमागमपदोज़्झिरम! । गहनाकाशसंकाशं वन्दे देवं गणेश्वरम् ।।

श्रीसनत्कुमार उवाच ।। शङ्कराब्रह्मणा प्राप्तं पद्मयोनेर्भया प्रभौः ।। तदहं कीर्तयिष्यामि स्तोत्रं परमदुर्लभम् ।। पष्ठयां चतुर्थ्यामिष्टम्यां चतुर्दश्यां च भक्तितः । पूजयेच्च गणाध्यक्षं श्रद्धाभक्तिसमन्वितः।। अर्धैः पुष्पैस्तथा धूपैर्दीपैर्माल्यैश्च चामरेः । वस्त्रैः कुण्डलकेयूरैर्मौलिभिश्चि वितानकैः ।। भक्ष्यैर्भोज्यैरपूपैश्च मत्स्यैर्मांसैश्च मोदकैः पानकैः फलमूलैश्च होमैमन्त्रादिभिस्तथा ।। गंगाह्रदे तु गागेय श्रीशैले तु गणेश्वरम् । वाराणस्यां गजमुखं गयायां टङ्कधारिणम् ।। प्रयागे तु गणाध्यशं केदारे विवटाननम् । लम्बोदरं कुरुक्षेत्र नैमिषे च मदोत्कटम् ।। जम्बकं दण्डकारण्ये लोकेशं हिमवद्गिरौ । विष्वक्सेनं च विन्ध्याद्रौ मलये हेमकुम्भकम् ।। नायकं पुष्करद्वीपे विघ्नेशंशल्मलौ स्थितम् । इलावृते विश्वरूपं हरिवर्षे घटोदरम् । त्रिनेत्रं सिंहलद्वीपे श्वेतद्वीपे तु वामनम् । उज्जयिन्यां तु लम्बोष्टं मालवे शूर्पकर्णकम् ।। सौराष्ट्रे वरदं नित्यं काश्मीरे भीमरूपिणम्। सिन्धुसागरयोर्मध्ये विज्ञेयं मन्त्रनायकम् ।। हर्यक्षं यक्षभवने कैलासे परमेश्वरम् । महोदरं तु लुम्पायां चम्पायां शिखिवाहनम् ।। पाशहस्तं त्रिकूटेषु पूजयेत्सर्वसिद्धिदम् । बलमग्निगुहायां तु पाटले सिंहवाहनम्। पौण्ड्रे रौद्रमुखं चापि कलापिग्रामके जयम् । मेरुपृष्ठे कामरूपं नन्दनं नन्दने वने ।। विजयं वै गन्धवने देवदारुवने गणम् । आर्तानसां विघ्नहरणं गङ्गासागरसंगमे । महापथे विरूपाक्षं चित्रसेनं तु पुष्करे । दुर्जयं यमनातीरे स्तम्भनं गन्धमादने ।। अम्बरीषं भद्रवठे मोहनं हस्तिनःपुरे। किष्किन्धायामुग्रकेतुं लंकाया तु विभीषणम् ।। कलिंगे वरुणं चैव विन्ध्यवादे मदोत्कटम् । अश्वत्थं च तुरुष्केषु चीनेषु त्रिशिखायुधम् ।। वज्रहस्तं कोसलेषु दाक्षिणात्येषु लोहितम् । शूलोद्धतकरं चैव मध्यदेशे प्रकीर्तितम् ।। एकदष्ट्र पश्चिमाद्रौ पूर्वदेशेऽपराजितम् । उत्तरे वारुवक्रं च वरिष्ठं त्रिपुरेषु च । हिरण्यकवचं चैव गिरिसन्धिषु संस्थितम् । सुमुखं नागरन्ध्रेषु नर्मदायां च षड्भुजम्

।। मायापुर्यां महामायं भद्रकर्णह्रदे शिवम् । गोकर्णे गजकर्णं च कान्यकुब्जे वराननम् ।। पद्मासनं कामरूपे श्रीमुखं सर्वतः स्थितम्। वेदवेदाङ्गशास्त्रेषु चिन्तयेद्गणनायकम् ।। अष्टाषष्टिस्तु नामानि स्तुतान्यद्भ, तकर्मणः। नित्यं प्रभातकाले तु चिन्तयेत्सर्वसिद्धिदम् ।। एतत्स्तोत्रं पवित्रं तु मङ्गलं पापनाशनम्। शस्त्रखर्वोदवेतालयक्षरक्षभयापहम् ।। चौरारण्य भयव्याघ्नव्याधि दुर्भिक्षनाशनम् । कृत्यादिमायाशमनं सर्वशत्रुविर्दनम् ।। त्रिसन्ध्यं यः पठेदेतत्स भवेत्सर्वसिद्धिभाक् । गणेश्वरप्रासादेन लभते शांकरं पदम् ।। इत्यादिपुराणे श्री गणेशस्तोत्रम् ।।

# शिवस्तोत्राणि

## ७—शिवमानसपूजा

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ।। १ ।।
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ।। २ ।।
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ।। ३ ।।
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।

सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४ ॥
करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ ५ ॥

इति श्रीमच्छङ्कराचार्यविरचिता शिवमानसपूजा समाप्ता ॥

## भवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥ १ ॥
भवाब्धावपारे महादुःखभीरुः
पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं । गतिस्त्वं० ॥ २ ॥
न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
न जानामि पूजां न च न्यासयोगम् । गतिस्त्वं० ॥ ३ ॥
न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर्गतिस्त्वं० ॥ ४ ॥
कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहम् । गतिस्त्वं० ॥ ५ ॥
प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये । गतिस्त्वं० ॥ ६ ॥

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि । गतिस्त्वं० ॥ ७ ॥
अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टः सदाहं । गतिस्त्वं० ॥ ८ ॥

इति श्रीमच्छङ्कराचार्यकृतं भवान्यष्टकं सम्पूर्णम् ।

## देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥ १ ॥
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ २ ॥
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ३ ॥
जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥

परित्यक्ता देवा विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥
चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥
न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥
नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥
आपत्सु मग्नः स्मरणं त्वदीयं
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः
क्षुधातृषार्ता जननीं स्मरन्ति ॥ १० ॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥ ११ ॥

मत्समः पातकी नास्ति पापघनी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरू ।। १२ ।।

ॐ नमः शमभवाय च मयो भवाय च
नमः शंकराय च मयस्कराय च
नमः शिवाय च शिवतराय च

ॐ

तच्क्षु देवहितं पुरसताच्छुक्र मुच्चरत
पश्येम शरदः शंत जीवमें शरदः शंत श्रणुयाम
शरदः शंत प्रब्रवाम शरदः शंतमदीनाः
स्याम शरदः शंत भयश्च शरदः शतात

ॐ

द्यौ शांतिरन्तरिक्ष शान्ति पृथिवी
शंतिरापः शांति राषधयः शान्ति वनस्पतयः
शांति विश्वदेवा शांति ब्रहमः शांति सर्व शांति रेव
शांति सा मा शांतिरेधि